Postal Regd.No. GAMC- 1553/2019-2021 ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १५ अङ्क : १७८
मार्च - २०२१

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### सम्बन्धानां सङ्ग्रहालयः

कुरुक्षेत्रविश्वविद्यालयः सम्प्रति 'धर्मक्षेत्रे कुरुक्षेत्रे' वर्तते। काचित् युद्धभूमिः शैक्षणिकं क्षेत्रं भवति इति कल्पना एव रोमहर्षं जनयति। अस्मिन् विश्वविद्यालये औरङ्गझेबस्य अग्रजेन दारासिकोहेन फारसीभाषया अनूदितं योगवासिष्ठस्य मूलग्रन्थं वयं प्रत्यक्षीकर्तुं शक्नुमः। तथैव श्रीलङ्कायाः प्रसिद्धं बुद्धमन्दिरं केण्डीनगरे वर्तते। बुद्धः सराज्यं सर्वाणि आभूषणानि परित्यज्य अरण्यं प्रति प्रस्थितः। तानि आभूषणानि तत्रत्यः धर्मगुरुः जनविशेषेभ्यः दर्शयति। महान् मनोविज्ञानी फ्रोइडः अन्तश्चेतनायाः प्रवाहं प्रति विशिष्टं चिन्तनम् अस्मभ्यं दत्तवान्। तस्य गृहे तेन एव लिखितानि प्रेमपत्राणि वयम् अद्य अपि 'स्वनेत्राभ्यां' पठितुं शक्नुमः। डार्विनस्य गृहे उत्क्रान्तिवादम् उद्दिश्य लिखिताः प्रारम्भिकाः लेखाः इतोऽपि रक्षिताः सन्ति। सङ्ग्रहः खलु सङ्ग्रहालयस्य धर्मः। मृतेषु जनेषु अपि सङ्ग्रहालयः जीवति। सः कस्मिंश्चित् कोणे अनेकानि मूल्यवन्ति वस्तूनि सङ्गोप्य भविष्यत्कालं प्रतीक्षते।

मानवहृदयम् अपि सम्बन्धानां सङ्ग्रहालयः इव प्रतिभाति। तत्रापि कश्चित् प्रच्छन्नः भागः रक्षितः भवति। तत्रत्यः विशिष्टः सुगन्धः जीवनं प्रसादयति। महादेव-देसाईवर्यं प्रति विद्यमानः महात्मगान्धिनः स्नेहः तस्य उदाहरणम् अस्ति। अत्र खलु जीवनस्य सार्थकता अनुभूयते। प्रायः तस्मात् हेतोः एव संन्यासिनां जीवने अपि केचन विशिष्टाः शिष्याः अनुयायिनः वा वर्तन्ते। लेखकः बहून् पाठकान् जानाति, परन्तु सः लिखति कांश्चन विशिष्टान् पाठकान् उद्दिश्य। अखिलं जगत् एतादृशैः विलक्षणैः सम्बन्धैः श्वसिति। एतान् च तर्कः, निन्दा, ईर्ष्या, परम्परा, वर्णः, लोभः वा खण्डयितुं न शक्नुवन्ति।

उत्तमाः सम्बन्धाः दैवयोगात् लभ्यन्ते। तत्रापि नैके विघ्नाः उत्पद्यन्ते। सम्बन्धाः नश्यन्ति। क्वचित् सम्बन्धनाशस्य मूलं न ज्ञायते। परिहारस्य दिशा न लभ्यते। तदा उभयपक्षे विवशतायाः अश्रूणि स्रवन्ति। तानि अश्रूणि पवित्राणि सन्ति।

# भक्ष्यैः पूर्णं पर्णम्



कमलपुरनिवासिनः विद्यानाथस्य आत्मविश्वासः आसीत् यत् अहं कामपि विद्यां परिश्रमं विनैव ज्ञातुं समर्थः अस्मि इति।

कानिचन दिनानि यावत् तेन वेदाध्ययनं कृतम्। तदनन्तरं सङ्गीतस्य, वैद्यकीयस्य, ज्योतिषस्य च अध्ययनं कृतम्। परन्तु तासु विद्यासु कस्याञ्चिदपि विद्यायां पारङ्गतः भवितुं न शक्तः सः। तस्मात् जनाः विद्यानाथस्य अपूर्णविद्याभ्यासविषये परस्परं वार्तालापं कुर्वन्तः तम् उपहसन्ति स्म। एतत् दृष्ट्वा विद्यानाथः चिन्तयति स्म यत् जनाः मद्विषयिण्या ईर्ष्यया एवं वदन्ति इति।

तस्य मातापितरौ पुत्रस्य अपूर्णविद्याभ्यासविषये नितरां चिन्तयतः स्म। तदीयस्य भविष्यस्य विषये महान्तं परिश्रमम् आचरतः स्म। तेषु दिनेषु विद्यानाथस्य मातृभगिनी कञ्चित् विवाहसम्बन्धं मनसि निधाय तस्य गृहम् आगतवती। विद्यानाथस्य माता दुःखपूर्णेन स्वरेण पुत्रस्य व्यवहारशैलीं विवृतवती। तदा तस्याः भगिनी उक्तवती "विवाहः यदि भविष्यति, तर्हि सर्वं सम्यक् भविष्यति। इदानीं यस्याः विवाहसम्बन्धार्थं मया आगतं, तस्याः नाम प्रियंवदा इति। प्रियंवदा अतीव सुन्दरी बुद्धिमती च अस्ति। सा विद्यानाथस्य अनुरूपा भविष्यति। सा पतिम् अवश्यं सन्मार्गं दर्शयिष्यति" इति।

विद्यानाथस्य मातापितरौ स्नुषात्वेन प्रियंवदायाः स्वीकारम् अङ्गीकृतवन्तौ। अचिरात् एव विद्यानाथप्रियंवदयोः विवाहः सम्पन्नः। श्वशुरगृहं प्रति आगमनात् किञ्चित् पूर्वं प्रियंवदा अवगतवती यत् पतिः महान् बुद्धिमान् एव, किन्तु आवश्यकतायाः अपेक्षया अपि अधिकः आत्मविश्वासः तस्मिन् अस्ति इत्यतः तस्मिन् स्थिरता न आगता इति।

कस्मिंश्चित् दिने प्रियंवदा जलानयनाय जलाशयं प्रति प्रस्थिता। 'आगच्छतु, मिलित्वा गच्छाव' इति सा पतिम् उक्तवती। यद्यपि विद्यानाथः गन्तुं न इच्छति स्म, तथापि पत्न्याः वचनं निराकर्तुम् अनिच्छन् सः तया सह प्रस्थितः। मध्येमार्गं तेन गुल्मस्य समीपे कश्चन बालकः पतितः दृष्टः। लुण्ठनं कुर्वतः तस्य मुखात् लालाफेनः निर्गच्छति स्म। प्रियंवदया कथितं – 'प्रायः अयं बालकः सर्पेण दष्टः अस्ति' इति। विद्यानाथः झटिति समीपस्थसस्यात् पर्णानि उत्पाट्य ततः सः रसं निष्पीड्य बालकस्य मुखे स्थापितवान्। शरीरस्य यः भागः सर्पेण दष्टः आसीत्, तमपि भागं तेन रसेन लिप्तवान् सः। दशनिमेषाभ्यन्तरे एव सः बालकः उत्थाय स्थितवान्। एतत् दृष्ट्वत्याः प्रियंवदायाः मनसि पत्युः वैद्यकीयज्ञानविषये महान् विश्वासः उत्पन्नः।

एतस्याः घटनायाः सप्ताहस्य अनन्तरं पार्श्वस्थे ग्रामे कस्यचित् सङ्गीतविदुषः सङ्गीतसभा प्रवृत्ता। प्रियंवदा पत्या सह तं सङ्गीतकार्यक्रमं गतवती। सङ्गीतकार्यक्रमस्य समाप्तेः पूर्वम् एव विद्यानाथः असन्तोषं प्रकटयन् पत्नीं

प्रियंवदाम् उद्दिश्य – ''एतस्य सङ्गीतज्ञस्य सङ्गीतं कर्कशम्, असम्बद्धं च अस्ति। तालो वा लयो वा न दृश्यते'' इति वदन् ततः उत्थितवान्। निरुपाया प्रियंवदा अपि पत्या सह ततः प्रस्थिता। मार्गे सा पतिं निवेदितवती यत् गीतमेकं गायतु इति। सुमधुरेण रागेण विद्यानाथः मोहनरागयुक्तं गीतं गीतवान्। तत् गीतं प्रियंवदायै नितराम् अरोचत। सा पतिम् उक्तवती – ''सङ्गीतविद्यायाम् इतोऽपि प्रावीण्यं कुतो वा न सम्पादनीयं भवता ? तत् सम्पादितं चेत् महान् सङ्गीतज्ञः भविष्यति भवान्'' इति।

''उत्तमसङ्गीतकारेण भवितव्यं चेत् का योग्यता भवेत् ? भवती वदतु'' इति प्रतिप्रश्नं कृतवान् विद्यानाथः।

''कस्यचित् महतः सङ्गीतज्ञस्य शिष्येण भवितव्यम्, तावदेव'' इति उक्तं प्रियंवदया।

''ममापेक्षया अपि यदि कश्चित् महान् सङ्गीतज्ञः स्यात्, तर्हि एव अयं प्रश्नः उदेति'' इति वदन् विद्यानाथः अग्रे गतवान्। पत्युः उत्तरं श्रुत्वा प्रियंवदा चिन्तितवती यत् मम पत्युः महान् अहङ्कारः अस्ति इति।

एतस्याः घटनायाः दिनद्वयस्य अनन्तरं प्रियंवदायाः मातृगृहतः कश्चित् कर्मकरः आगतवान्। तस्याः मात्रा पुत्र्याः निमित्तं कानिचन मधुरभक्ष्याणि प्रेषितानि आसन्। तस्याः मातापितृभ्यां सः कर्मकरः उक्तः आसीत् यत् प्रत्यागमनसमये भवता मम पुत्र्याः सकाशात् कुशलिविषयकं पत्रमेकम् आनेतव्यम् इति।

प्रियंवदा रात्रौ गृहकार्यादिकं समाप्य पत्रमेकं विलिख्य सुप्तवती। पत्न्याः भाषाज्ञानं कथम् अस्ति इति ज्ञातुं विद्यानाथस्य इच्छा उत्पन्ना। अतः सः तत् पत्रं पठितवान्।

'अत्र सर्वं कुशलम्' इति पत्रम् आरब्धवती प्रियंवदा अग्रे लिखितवती आसीत् – ''मम पतिः भक्ष्यैः पूर्णेन पर्णेन सदृशः अस्ति। स्वादु भोजनं परिविष्टं चेदपि स्वादं किं वा जानाति पर्णम् ? ये भोजनं कुर्वन्ति ते एव तस्य स्वादम् अवगच्छन्ति। मम पतिः अपि एतादृशः एव। तस्मिन् वैद्यकीयज्ञानम् अस्ति, सङ्गीतज्ञानम् अस्ति, ज्योतिषज्ञानम् अपि अस्ति। परन्तु एतत् सर्वम् अपि इतरेषाम् अवरोधार्थम् एव अस्ति। एतस्मात् कारणात् भवतोः जामातुः कापि विद्या सफला सार्थिका वा न भविष्यति। परिपूर्णविदुषः पत्नी अस्मि इति अहं सगर्वं यस्मिन् दिने वदेयं तादृशं दिनं मया अचिरात् एव यथा प्राप्येत तथा आशिषा मम अनुग्रहं कुरुताम्'' इति।

विद्यानाथः समग्रं पत्रम् अवधानपूर्वकं पठितवान्। तदा सः स्वस्य न्यूनताम् अवगतवान्। एतावत्पर्यन्तम् अपि पत्न्याः मुखात् कदापि निन्दापदमात्रम् अपि न निर्गतम् आसीत्। अद्य तस्याः हृदयस्थः भावः अवगतः आसीत् तेन। सः वैद्यवृत्तिं बहुधा इच्छति स्म। एषा विद्या इतरेषां सेवामार्गोऽपि अस्ति इति विचिन्त्य सः निर्णीतवान् यत् वैद्यकीयविद्यायां नैपुण्यं सम्पादयिष्यामि, जनसेवायां निरतः भविष्यामि च इति।

तस्यां रात्रौ विद्यानाथेन निद्रा न प्राप्ता। परेद्यवि प्रातः शीघ्रम् एव उत्थाय सः पत्नीम् उक्तवान् – ''भवत्याः मनसः वेदना मया ज्ञाता। भवत्या मम अज्ञानं निवारितम्। तस्मिन् दिने वैद्यकीयज्ञानेन अहं तस्य बालकस्य प्राणान् रक्षितवान्। तस्मात् वैद्यकीयम् एव वर्षं यावत् पठिष्यामि। तावत् आवाभ्यां पार्थक्येन वसनीयम्'' इति।

विद्यानाथे जातं परिवर्तनं दृष्ट्वा प्रियंवदा तस्याः मातापितरौ च नितरां सन्तुष्टाः।

विद्यानाथः प्राचीनवैद्यशास्त्रं वर्षं यावत् अधीत्य समर्थः वैद्यः सन् स्वग्रामं प्रत्यागतः।

# क्रिकेट्-क्रीडा

✍ डॉ. सुखेश्वरः झा

(अनुवर्तते... )



क्रीडताम् आचारान् निरीक्षितुं, सत्यान्तदवहेलनायां दोषिणो दण्डयितुम् आदितोऽवसान-पर्यन्तन्तदीयाचार-संहिता-परिपालनं कारयितुम् द्वौ 'अम्पायर' (umpire) इत्यभिधीयमानौ निर्णायकौ भवतः। यः पक्षः खेलति तस्य 'बैट्स-मैन' इति 'रनर' इति च द्वौ एव एकदा क्रीडाङ्गणेऽवतरतः। अपरः पक्षः यः साम्मुख्यं विधत्ते तस्य सर्वं एव एकादश सदस्याः क्रीडाङ्गणेऽनेकेषु निर्धारितेषु स्थानेषु सन्नद्धाः तिष्ठन्तः क्रीडा-सहयोगम् आचरन्तः प्रतिरुन्धन्ति। क्रीडकपक्ष-सदस्यो यथा यथा बहिर्भवति तथा तथा तत्पक्षीयेषु एकादशसु सदस्येषु अवशिष्टाः द्विशः क्रमशोऽवतीर्णाः भवन्ति। खेलकपक्षे पूर्णतो बहिर्भूते, रक्षक-पक्षः खेलितुम् आयाति तदा बहिर्गतः पक्षः रक्षा-पक्षे सन्नद्धो भवति। इत्थङ्कारम् इयं खेला भवति।

इयं खेला अनेकदिन-व्यापिनी भवति। क्रीडा-प्रारम्भ-दिनात् आरभ्य अनेकानि, विशेषतः पञ्च दिनानि यावत् पूर्वाह्णेदश-वादन-प्राये समये प्रारब्धा अपराह्णे, सायाह्ने वा चतुःपञ्च-षड्-वादन-प्रायां वेलां यावत् क्रीड्यते। सततं यान्त्याः गोलाकारायाः पृथिव्याः स्थिर-दिनकर-दिशि तत् किरण-योगात् प्रकाशिते भागे भारते निर्दिष्टचरे काले प्रचलन्त्याम् अस्यां क्रीडायां तदपर-दिशि मह्यां यूरोपामरीकादि-महादेश-प्रविभागेषु निशावतिष्ठते। तथैव अन्यत्रोपर्युक्तमहादेशादिषु दिनेषु सत्सु इह भारत-देशे रात्री राजते। इतोऽन्यत्र महादेशेषु बहुषु क्रीड्यमानायाम् अस्यां, भारते निशीथे तदुत्तर-वर्तिन्यपि च काले रात्रौ मधुरां निद्रां विद्राव्य क्रीडा-प्रेमिभिः 'रेडियो' 'टीवी' - माध्यमेन प्रत्यक्ष-दृष्ट-वृत्त-प्रसारणाधारेण भवन्त्याः क्रीडायाः मधुरो रसः सतृष्णं पेपीय्यते।

सेयं क्रीडा भारतेऽधुना लोकप्रिया बोभवीति। विकलया अविकलया वा सामग्र्या, ग्रामेषु नगरेषु वा, अधनाः सधनाः वा, युवानः, बालाः, शिशवो वा, स्वां-स्वां वैयक्तिकीं स्थितिं देशीय-परिस्थितेः अनुरूपतां वा अविमृशन्तः, साम्राज्यवादि-सञ्चालितायां तस्याम् अपेक्षितां महार्घां सामग्रीम् अचेतयन्तः अस्यां क्रीडायां मत्ता इवासक्ताः सन्ति। अन्ये विविध-वयोभृतः अधिकारिणः कार्यालय-सहायकाः, छात्राः, अध्यापकाः वा, गृहे कार्यालये विद्यालये अध्यापक-कक्षे वा, रहसि समूहे वा, बहुधा नित्य-कृत्यानि अपि विस्मृत्य उपेक्ष्य वा, संसारे कुत्रापि भवन्त्याः अस्याः क्रीडायाः वृत्तान्तं श्रोतुं रेडियो-यन्त्र-लग्न-कर्णाः सन्तिष्ठन्ते। सर्वम् एतत् अस्याः क्रीडायाः अतितमां लोक-प्रियतां व्यनक्ति।

(क्रमशः... )

# मासवार्ता

## सम्पन्नः एकादशः पदवीदानसमारम्भः




एकलव्य-संस्कृत-एकेडेमी-संस्थानस्य एकादशः पदवीदानसमारम्भः फरवरीमासे षष्ठे दिनाङ्के विशेषरूपेण आन्तरजालमाध्यमेन अभवत्। तस्मिन् दिने संस्थाने आवर्षं विविधेषु अभ्यासक्रमेषु ये छात्राः अध्ययनम् अकुर्वन् तेषां १४८ छात्राणां प्रमाणपत्राणाम् उद्घोषणा अभवत्।

पदवीदानसमारम्भेऽस्मिन् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिमहोदयाः परमादरणीयाः श्रीगोपबन्धुमिश्रमहाभागाः मुख्यातिथिरूपेण उपस्थिताः आसन्। महाभागाः प्रभावकैः मनःप्रबोधकैः आशीर्वचनैः छात्रान् बोधितवन्तः यत् – ''पदवीं प्राप्य आत्मनः गौरवम् अनुभूय चिन्तनीयं यत् अस्माभिः अपि संस्कृतवाङ्मयस्य सेवा कथं करणीया ? दीक्षायाः शिक्षायाः सार्थक्यं किम् ? फलं किम् ? उपनिषत्-परम्परायां शिक्षावल्ल्याम् उपदिष्टम् अस्ति यत् –

''यानि अनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि '' तदनुसारं संस्कृतभाषायाः शिक्षकेन ज्ञातव्यं यत् गुरोः अनवद्यानि कार्याणि कानि ? तर्हि श्रेष्ठानां मार्गम् अनुसृत्य तैः यथा आचर्यते तादृशानि कर्माणि अनवद्यानि।

गुरुः अनेकैः प्रकारैः उत्साहपूर्वकं सरलतया विषयस्य उपस्थापनं कृत्वा ब्रह्मरूपेण बोधम् उत्पादयति। छात्रेषु जीवनस्य व्यापकतायाः बोधं बोधयित्वा तेषु विष्णुत्वं सम्पादयति। जीवने राष्ट्रस्य, समाजस्य, अपरस्य च कृते त्यागभावनां जनयित्वा महेश्वरत्वं जनयति। सर्वेषु जीवेषु नित्यविद्यमानः साक्षात् परब्रह्मस्वरूपगुरुः एभिः प्रकारैः स्वस्य दायित्वं वहति। यस्य आचरणं, सम्भाषणं, व्यवहारश्च मया अपि साधनीयाः इति मनसि भावः आयाति सः उत्तमः आचार्यः।''

अनेन प्रकारेण एकघण्टात्मकः कार्यक्रमः सम्पन्नः अभवत्। अत्र उल्लेखनीयं यत् कार्यक्रमेऽस्मिन् एकलव्य-संस्कृत-एकेडेमीसंस्थानस्य अध्यक्षः श्रीसुनील हाण्डामहोदयः उपस्थितिं प्रदाय छात्रेषु उत्साहम् अवर्धयत्।

## कृपया हसन्तु

पिता - (पुत्रम् उद्दिश्य) त्वम् अद्य विद्यालयं किमर्थं न गतवान् ? अद्य अवकाश: अस्ति किम् ?

पुत्र: - न पित: ! अवकाश: तु श्व: अस्ति ।

पिता - (क्रोधेन) तर्हि अद्य विद्यालयं किमर्थं न गतवान् ?

पुत्र: - मया अद्यैव पठितं यत् 'श्व: करणीयानि कार्याणि अद्यैव करोति बुद्धिमान् ।'

★ ★ ★ ★ ★

पत्नी - (पतिम् उद्दिश्य) भवान् मयि कति प्रतिशतं विश्वासं करोति ?

पति: - ८२ प्रतिशतम् ।

पत्नी - १०० प्रतिशतं किमर्थं न ?

पति: - किं त्वं न जानासि ? १८ प्रतिशतं तु 'GST' लगति ।

★ ★ ★ ★ ★

शिक्षक: - (रमणं प्रति) भो: रमण ! धेन्वा: गोपालकस्य च मध्ये क: भेद: ?

रमण: - महोदय ! धेनु: केवलं दुग्धं ददाति । गोपालक: जलमिश्रितं दुग्धं ददाति इत्येष: एव भेद: ।

★ ★ ★ ★ ★

रमण: - (नमनं प्रति) य: स्वस्य कथनम् अन्यस्मै अवगमयितुं न शक्नोति स: मूर्ख: कथ्यते ।

नमन: - भो:, त्वं किं वक्तुं इच्छसि ? अहं न अवगतवान् ।

## प्रहेलिका

– संस्कृतविकिपिडीयाजालस्थानात्

**वृक्षाग्रवासी न च पक्षिराजः त्रिनेत्रधारी न च शूलपाणिः ।**
**त्वग्वस्त्रधारी न च सिद्धयोगी जलं च बिभ्रत् न घटो न मेघः ॥**

वृक्षस्य अग्रभागे वसामि, किन्तु पक्षिजातीयः नास्मि । मम नेत्रत्रयं विद्यते, किन्तु अहं शूलपाणिः नास्मि । चर्मवस्त्रं धृतवान् अस्मि, किन्तु अहं सिद्धयोगी नास्मि । अहं जलं धरामि, किन्तु नाहं घटः न वा मेघः ।

**उत्तरम्** – नारिकेलः

**क्वचित् प्रस्तरतुल्योऽस्मि क्वचिच्च तरलं पुनः ।**
**क्वचिद्वायुसमं सूक्ष्मं पश्यन्ति सदा जनाः ॥**

कुत्रचित् अहं पाषाणतुल्यम् अस्मि । कुत्रचित् अहं तरलम् । कुत्रचित् अहं वायुसमं सूक्ष्मम् अस्मि । जनाः सदा मां पश्यन्ति ।

**उत्तरम्** – जलम्

**शैलजा पार्वती नास्मि वैष्णवी न हरिप्रिया ।**
**माताहं जीवनं दात्री यो जानाति स पण्डितः ॥**

अहं शैलजा अस्मि किन्तु पार्वती नास्मि । अहं वैष्णवी अस्मि किन्तु हरिप्रिया नास्मि । अहं जीवनदात्री अस्मि, मातापि अस्मि । मां यः जानाति सः पण्डितः ।

**उत्तरम्** – गङ्गामाता

## ज्ञानसरिता

श्यामः पटेलः

**नासा** – अमेरिकादेशस्य ''नासा'' नाम्नी खगोलसंशोधनसंस्था सुप्रसिद्धा । तस्याः सम्पूर्णनाम ''नेशनल एरोनोटिक्स एण्ड स्पेस एडमिनिस्ट्रेशन'' अस्ति। नासा–संस्थायाः आरम्भः ख्रिस्ताब्दस्य १९५८ तमे वर्षे ओक्टोबरमासस्य प्रथमे दिनाङ्के जातः । तस्याः प्रक्षेपणयानस्य निर्माणाय निर्मितस्य भवनस्य तावत् औन्नत्यं वर्तते यत् तस्य भवनस्य अन्तिमाट्टस्य समीपं मेघानां निर्माणः भवति। एतस्मिन् भवने विश्वस्य गुरुतमं वातानुकूलितयन्त्रं स्थापितं वर्तते।

नासा–संस्थया अद्य पर्यन्तं सूकरः, वानरः, मूषकः, शशः, तन्तुनाभप्रभृतयः २२०० यावन्तः जीवजन्तवः अवकाशं प्रति प्रेषिताः सन्ति । नासा–संस्थायाः ''कोलम्बिया'' नामकं प्रथमम् अवकाशयानम् तस्य २८ तम्यां यात्रायां पृथिवीं प्रत्यागमनसमये २००३ तमे वर्षे भस्मावशेषम् अभवत्।

अवकाशयात्रिकाणां प्रशिक्षणाय अन्तरराष्ट्रिय–अवकाश–केन्द्रस्य प्रतिकृतिः नासा–संस्थायां रचिता अस्ति । संस्थायाम् एकः बृहत् तरणतालः अस्ति यस्य गात्रम् ओलिम्पिकक्रीडायाः १० तरणतालाः यावत् अस्ति। तस्य तरणतालस्य अधः एव ''ब्युअन्सी लेबोरेटरी'' इति अस्ति यत्र अवकाशयात्रिकाणां प्रशिक्षणं प्रचलति। संस्थायाः ज्होन्सन–अवकाश–केन्द्रं ६६० हेक्टरपरिमितायां भूमौ व्याप्तम् अस्ति। यस्यां १०० भवनानि सन्ति।

एकं वैचित्र्यम् अस्ति यत् यमनदेशस्य त्रयाणां नागरिकाणां पक्षः आसीत् यत् ३००० वर्षेभ्यः मङ्गलग्रहः तेषां पूर्वजानां सम्पत्तिः अस्ति। अतः अवैधं प्रवेशं कृतवत्याः नासा–संस्थायाः उपरि तैः अभियोगः कृतः आसीत्।

संस्थया नूतनावकाशयानस्य नामकरणाय प्राथमिकविद्यालयानां छात्रेषु स्पर्धा क्रियते। ततः एव नामकरणं भवति।

प्रक्षेपणयानम् – space vehicle, अट्टः – floor, वातानुकूलितयन्त्रम् – AC, प्रतिकृतिः – replica,
तरणतालः – swimming pool, अभियोगः – civil case

## शब्दमञ्जूषा

| | |
|---|---|
| **संविधानम्** | constitution |
| **अनुबन्धः** | contract |
| **नियन्त्रणम्** | control |
| **सहयोगः** | cooperation |
| **परिषद्** | council |
| **राज्यसभा** | council of states |
| **कर्गलमुद्रा** | currency notes |
| **द्विचक्रिका** | cycle |
| **उपाधिः** | degree |
| **आज्ञप्तिः** | decree |
| **लोकतन्त्री** | democrat |
| **विभागः** | department |
| **उपमण्डलाधीशः** | deputy collector |
| **अधिनायकः** | dictator |
| **मण्डलपरिषद्** | district board |

## किं भवन्तः जानन्ति ?

**१ ) विजयादशमीपर्व कस्यां तिथौ भवति ?**
(क) कार्तिककृष्णदशम्याम् (ख) माघशुक्लदशम्याम्
(ग) आश्विनशुक्लदशम्याम् (घ) चैत्रशुक्लदशम्याम्

**२ ) रक्षाबन्धनपर्व कस्मिन् मासे कस्यां तिथौ च भवति ?**
(क) कार्तिकामावस्याम् (ख) चैत्रपूर्णिमायाम् (ग) श्रावणपूर्णिमायाम्
(घ) भाद्रपदसप्तम्याम्

**३ ) होलिकादहनपर्व कस्मिन् मासे कस्यां तिथौ च भवति ?**
(क) फाल्गुनपूर्णिमायाम् (ख) माघामावस्याम् (ग) चैत्रप्रतिपदायाम्
(घ) कार्तिकदशम्याम्

**४ ) दीपावलीपर्व कस्मिन् मासे कस्यां तिथौ च भवति ?**
(क) आश्विनपूर्णिमायाम् (ख) आश्विनामावस्यायाम्
(ग) कार्तिकपूर्णिमायाम् (घ) कार्तिकामावस्यायाम्

**५ ) 'विक्रमसंवत्' इत्यस्य आरम्भः कस्मिन् मासे कस्यां तिथौ च भवति ?**
(क) चैत्रामावस्याम् (ख) चैत्रशुक्लप्रतिपदायाम् (ग) फाल्गुनपूर्णिमायाम्
(घ) वैशाखपूर्णिमायाम्

**६ ) मत्स्यावतारः कस्यां तिथौ अभवत् ?**
(क) भाद्रपदकृष्णषष्ठ्याम् (ख) आश्विनशुक्लदशम्याम्
(ग) श्रावणशुक्लसप्तम्याम् (घ) चैत्रशुक्लपञ्चम्याम्

उत्तराणि – (१) ग (२) ग (३) क (४) घ (५) ख (६) घ

# अस्माकम् आगामिकार्यक्रमाः


"संस्कृतसाम्प्रतम्" मासिकस्य विषये पत्रक्रमाङ्क ४ अनुगुणं विवरणम्।

१. प्रकाशनस्थानम् - "एकलव्य संस्कृत एकेडेमी" कोरहाउस, ओफ सी.जी.रोड, परीमलगार्डन समीपम्, एलिसब्रिज, अमदावाद-६

२. प्रकाशनकाल: - मासिक:

३. मुद्रक: प्रकाशक :- मिहिर उपाध्याय: राष्ट्रियता - भारतीय:

४. सम्पादक: - मिहिर उपाध्याय: राष्ट्रियता - भारतीय:

संङ्केत: - 'एकलव्य संस्कृत एकेडेमी" कोर हाउस, ओफ सी. जी. रोड, परीमलगार्डन समीपम्, एलिसब्रिज, अमदावाद- ६

५. सदस्यनाम मिहिर उपाध्याय:, सम्पादक:

संङ्केत: - "एकलव्य संस्कृत एकेडेमी" कोरहाउस, ओफ सी.जी.रोड, परीमलगार्डन समीपम् एलिसब्रिज, अमदावाद- ६

अहं मिहिर उपाध्याय: घोषयामि यत्, उपरोक्ता: अंशा: नियमानुसारं योग्या: सन्ति।

दिनाङ्क: १/०३/२०२१



EKLAVYA SANSKRIT ACADEMY

**Admission Open**

# संस्कृतभाषाशिक्षणम्

**First Level**

**Date :** 12/4/21 to 14/7/21
**Day :** Mon-Wed-Fri
**Time :** 6:30 pm to 8:00 pm
**Fees :** 5000/-
**Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

**Admission Open**

Value Education Through Sanskrit in

# बालसंस्कृतवर्गः

(Class SKg to 8)

**Date :** 12/6/21 to 26/3/22
**Day :** Every Saturday
**Time :** 6:00 pm to 7:30 pm
**Fees :** 5000/-
**Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

संस्कृत-
साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |


**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति।

EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||


**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006